नामांक Roll No.

Sl.No. :

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 7

**VU–87–Sahit. Shas. (Supp.)**

# वरिष्ठ उपाध्याय पूरक परीक्षा, 2025

# VARISHTHA UPADHYAYA SUPPLEMENTARY EXAMINATION, 2025

## साहित्य – शास्त्रम्

**समय** : 3 **घण्टे** 15 **मिनिट**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।

2) **सर्वे** प्रश्नाः समाधेयाः।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेखनीयानि।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्डः – ''अ''

**1)** बहुविकल्पात्मक प्रश्नाः – **[18×1=18]**

i) उपमानोपमेययोः बिम्बप्रतिबिम्ब भावः भवति – **[1]**

अ) दीपकालङ्कारे ब) उपमालङ्कारे

स) दृष्टान्तालङ्कारे द) रूपकालङ्कारे

ii) ''दिगन्तमगमद्यस्य कीर्तिः प्रत्यर्थिभिः सह'' इत्यत्र अलङ्कारः– **[1]**

अ) सहोक्तिः ब) निदर्शना

स) दीपकम् द) तुल्ययोगिता

iii) बीभत्सरसस्य स्थायिभावः वर्तते – **[1]**

अ) जुगुप्सा ब) विस्मयः

स) उत्साहः द) हासः

iv) काव्ये रससन्दर्भे कारणरूपः भवति – **[1]**

अ) अनुभावः ब) सञ्चारिभावः

स) स्थायिभावः द) विभावः

v) चन्द्रालोकानुसारं सर्वसङ्कलितध्वनेः भेदाः सन्ति – **[1]**

अ) एकपञ्चाशत् ब) द्वात्रिंशत्

स) द्वादश द) दश

vi) आह्लादस्य चमत्काराभावे वा भवति – **[1]**

अ) ध्वनिकाव्यम् ब) उत्तमोत्तमकाव्यम्

स) गुणीभूतव्यङ्ग्यम् द) सहृदयकाव्यम्

vii) चन्द्रालोके लक्षणा कस्मिन् मयूखे वर्णिता – **[1]**

अ) नवमे ब) दशमे

स) सप्तमे द) पञ्चमे

viii) ''पाचकः'' इत्यत्र कया अभिधा? [1]

अ) जात्या ब) गुणेन

स) क्रियया द) संज्ञया

ix) काव्यशास्त्रदृष्ट्या ''मेघदूतम्'' काव्यम् विद्यते – [1]

अ) महाकाव्यम् ब) नीतिकाव्यम्

स) कथाकाव्यम् द) खण्डकाव्यम्

x) यक्षः कुत्र वसतिं चक्रे? [1]

अ) कैलाशपर्वते ब) रामगिर्याश्रमे

स) देवगिरौ द) कृष्णगिर्याश्रमे

xi) गोपवेशस्य कान्तिमापत्स्यते – [1]

अ) मेघः ब) आम्रकूटः

स) यक्षः द) कुबेरः

xii) दशार्ण देशस्य राजधानी वर्तते – [1]

अ) रामगिरिः ब) उज्जयिनी

स) विदिशा द) आम्रकूटगिरिः

xiii) शम्भोः केशग्रहणम् अकरोत् – [1]

अ) यमुना ब) देवाङ्गना

स) जह्नोः कन्या द) पार्वती

xiv) प्रतिमानाटकस्य नायकोऽस्ति – [1]

अ) भरतः ब) दशरथः

स) रामः द) लक्ष्मणः

xv) दशरथस्य मृत्योवर्णनं प्रतिमानाटकस्य कस्मिन् अङ्के अस्ति? [1]

अ) प्रथमे ब) द्वितीये

स) चतुर्थे द) सप्तमे

xvi) कैकेयी भरतस्य कृते इच्छति – [1]

अ) राजभवनम् ब) स्वर्गारोहणम्

स) मातुलगृहगमनम् द) राज्याभिषेकम्

xvii) सीतायाः रक्षणकाले रावणेन सह युद्धं कुर्वन् दिवङ्गतः – [1]

अ) जटायुः ब) हनुमान्

स) कुम्भकर्णः द) अङ्गदः

xviii) दशरथस्य तृतीयात्मजस्य नाम – [1]

अ) भरतः ब) शत्रुघ्नः

स) लक्ष्मणः द) रामः

**2)** रिक्तस्थानानि पूरयत – **[6×1=6]**

i) ................ विशेषश्चेदुपमानोपमेययोः। **[1]**

ii) आस्वाद्यमानैकतनुः .................. रसो स्मृतः। **[1]**

iii) इत्येवं बोद्धृवैचित्र्याद् .................. चतुर्विधम्। **[1]**

iv) शब्दे पदार्थे वाक्यार्थे सङ्ख्यायां ................ तथा। **[1]**

v) याच्ञा मोघा वरमधिगुणे ................. लब्धकामा। **[1]**

vi) सूर्य दिवसावसाने छायेवन दृश्यते .................। **[1]**

**3)** अतिलघूत्तरात्मक प्रश्नाः – **[12×1=12]**

i) कारणे विद्यमाने सति कार्यस्य अभावः कस्मिन् अलङ्कारे भवति? **[1]**

ii) समासरहिता स्वल्पसमासयुक्ता वा रीतिः का? **[1]**

iii) श्रृङ्गार रसस्य स्थायिभावः कः? **[1]**

iv) विवक्षितवाच्यस्य द्वौ भेदौ कौ? **[1]**

v) अभिधावृत्या कोऽर्थो अभिधीयते? **[1]**

vi) चन्द्रालोकानुसारं अभिधा कतिविधा? **[1]**

vii) के जललवमुचः यक्षस्य मार्गं सूचयिष्यन्ति? **[1]**

viii) रन्तिदेवस्य कीर्तिरूपा नदी का? **[1]**

ix) मेघः केषां समवायो विद्यते? **[1]**

x) प्रतिमागृहे केषां प्रतिमाः स्थापिताः आसन्? **[1]**

xi) ''वने व्याघ्री च कैकेयी त्वया किं न कृतं त्रयम्'' इतिकस्य कथनम्? **[1]**

xii) प्रतिमानाटके कति अङ्काः सन्ति? **[1]**

## <u>खण्डः – ''ब''</u>

लघूत्तरात्मक प्रश्नाः – [10×2=20]

4) ''तापेन भ्राजते सूर्यः शूरश्चापेन राजते'' इत्यत्र कोऽलङ्कारः? तल्लक्षणं लेखनीयम्। [2]

5) दीपकालङ्कारस्य लक्षणं विलिख्य उदाहरणमपि लिखत। [2]

6) निदर्शनालङ्कारस्य लक्षणं सोदाहरणं लिखत। [2]

7) अपराङ्गगुणीभूतव्यङ्ग्यं कुत्र भवति? सोदाहरणं लिखत। [2]

8) गुणीभूतव्यङ्ग्यस्य अष्टभेदाः नामतो गणनीया। [2]

9) रामगिरिपर्वतस्यवर्णनं मेघदूत दिशा लिखत। [2]

10) हास्यरसस्य स्वरूपं लिखत। [2]

11) प्राप्ते मित्रे क्षुद्रोऽपि कस्मात् विमुखो न भवति? [2]

12) ''राज्ञः शनैरभिहितं च न चास्मि राजा'' इत्यत्र छन्दः परिचीय तल्लक्षणमपि लेखनीयम्। [2]

13) ''क्व ते ज्येष्ठो रामः प्रियसुत! सुत! सुतः सा क्व दुहिता'' इत्यत्र छन्दः परिचीय लक्षणमपि लिखत। [2]

## खण्डः – ''स''

दीर्घोत्तरीयाः प्रश्नाः – [4×3=12]

14) अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः सप्रसंग व्याख्या करणीया। [1+2=3]

अ) व्याघ्रादिभिर्विभावैस्तु वेपिताद्यनुभावकृत्।
भावैर्मोहादिभिर्युक्तो भयस्थायी भयानकः।।

ब) रेफाक्रान्ता वर्ग्ययणाष्टवर्गात्पञ्चमादृते।
कपाक्रान्तस्तवर्गः स्यात्प्रौढायां च कमूर्धता।।

15) अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः व्याख्या करणीया। [3]

अ) लक्षणीयस्वशब्दस्य मीलनाऽमीलनाद् द्विधा।
लक्षणा सा त्रिधा सिद्धसाध्यसाध्याङ्ग भेदतः।।

ब) लक्ष्य लक्षक वैशिष्ट्याद् द्विविधा लक्षणा पुनः।
सरसं काव्यममृतं विद्या स्थिरतरं धनम्।।

16) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य श्लोकस्य सप्रसंङ्गभावार्थो लेखनीयः। [1+2=3]

अ) तस्मिन्नद्रौ कतिचिदबला विप्रयुक्तः स कामी,
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं,
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।।

ब) वीचिक्षो भस्तनितविहग श्रेणिकाञ्ची गुणायाः,
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भव रसाऽभ्यन्तरः सन्निपत्य,
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।।

17) प्रतिमानाटकस्य चतुर्थाङ्कस्य कथासारः संस्कृतेन स्वशब्दैः लेखनीयः। [3]

अथवा

रामस्य चरित्रचित्रणम् करणीयम्।

## खण्डः – ''द''

निबन्धात्मक प्रश्नाः – [3×4=12]

18) अधोलिखितयोः कारिकयोः एकस्याः कारिकायाः सप्रसंङ्ग–व्याख्या करणीया। [1+3=4]

अ) वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी।
भारती भाति गम्भीरा कुटिला सरला क्वचित्।।

ब) वक्तृस्यूतं बोधयितुं व्यङ्ग्यं वक्तुरभीप्सितम्।।
स्वाङ्कुरितमतद्रूपं स्वयमुल्लसितं गिरः।।

19) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्ग–व्याख्या करणीया। [1+3=4]

अ) तां चावश्यं दिवसगणनात्परामेकपत्नी,–
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यः पाति प्रणयिहृदयं विप्रयोगे रूणद्धि।।

ब) तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां,
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः।
दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेषं,
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।।

20) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसंङ्ग–व्याख्या करणीया। [1+3=4]

अ) वनगमननिवृत्तिः पार्थिवस्यैव ताव–
न्मम पितृपरवत्ता बालभावः स एव।
नवनृपतिविमर्शे नास्ति शङ्का प्रजाना–
मथ च न परिभोगैर्वञ्चिता भ्रातरो मे।।

ब) नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनो,
हेषाशून्यमुखाः सवृद्धवनिता बालाश्च पौरा जनाः।
त्यक्ताहारकथाः सुदीनवदनाः क्रन्दन्त उच्चै दिशा,
रामो याति यया सदारसहजस्तामेव पश्यन्त्यमी।।

ⓘⓘⓘⓘ

DO NOT WRITE ANYTHING HERE